वेदाविनाशिनं नित्यं य एनमजमव्ययम्।

कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ २.२१॥

vedāvināśinaṁ nityaṁ ya enamajamavyayam |
kathaṁ sa puruṣaḥ pārtha kaṁ ghātayati hanti kam || 2.21||

वासांसि जीर्णानि यथा विहाय

नवानि गृह्णाति नरोऽपराणि।

तथा शरीराणि विहाय जीर्णानि

अन्यानि संयाति नवानि देही॥ २.२२॥

vāsāṁsi jīrṇāni yathā vihāya
navāni gṛhṇāti naro'parāṇi |
tathā śarīrāṇi vihāya jīrṇāni
anyāni saṁyāti navāni dehī || 2.22||

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।

न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥ २.२३॥

nainaṁ chindanti śastrāṇi nainaṁ dahati pāvakaḥ |
na cainaṁ kledayantyāpo na śoṣayati mārutaḥ || 2.23||

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।

नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥ २.२४॥

acchedyo'yamadāhyo'yamakledyo'śoṣya eva ca |
nityaḥ sarvagataḥ sthāṇuracalo'yaṁ sanātanaḥ || 2.24||

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।

तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥ २.२५॥

avyakto'yamacintyo'yamavikāryo'yamucyate |
tasmādevaṁ viditvainaṁ nānuśocitumarhasi || 2.25||